दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लद्वादशी
आषाढः 12 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-244 | 1 | जून 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमन्त्रिणा सुक्खुना नेरी-कलांक्षेत्रे १०.६६ कोटिरूप्यकाणां १२ विकासात्मक- परियोजनानाम् उद्घाटनं शिलान्यासश्च कृताः

3 IIT MANDI CONFERENCE- विशेषज्ञाः अवदन्- एकं न, बहवः सङ्कटाः सहैव, निर्मातव्या भविष्यति बहु- आपदा-रणनीतिः

4 प्रधानमन्त्रिणा नरेन्द्रमोदिना संविधान-हत्या-दिवसस्य अवसरे पूर्वप्रधानमन्त्रिणा अटलबिहारी-वाजपेयी-वर्येण लिखिताया: काव्यस्य पङ्क्तयः पठिताः

## कृषिमन्त्री शिवराजसिंहचौहानः लखनऊ इत्यत्र 'क्लीन प्लाण्ट सेण्टर' (स्वच्छ-सस्य-केन्द्रम्) स्थापयितुं उद्घोषणां कृतवान्




**हिमसंस्कृतवार्ता।** केन्द्रीय-कृषि-कृषककल्याण-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः उत्तरप्रदेशे उद्यानपालनक्षेत्रस्य (बागवानी) विकासाय लखनऊनगरे एकं 'क्लीन प्लाण्ट सेण्टर' (स्वच्छ-सस्य-केन्द्रम्) स्थापयितुं उद्घोषणां कृतवान्। अस्य केन्द्रस्य माध्यमेन कृषकेभ्यः उच्चगुणवत्तायुक्ताः रोगमुक्ताः च पादपसामग्र्यः (पौधे) प्रदास्यन्ते। अनेन उद्यानपालनकृषेः विस्तारः भविष्यति, कृषकाणाम् आयवर्धने च साहाय्यं मिलिष्यति। लखनऊ योजनाभवने मुख्यमन्त्री योगी आदित्यनाथः केन्द्रीयमन्त्री शिवराजसिंहचौहानः च राज्यस्य कृषियोजनानां, केन्द्र-राज्यसर्वकारयोः विविधानां योजनानां क्रियान्वयनस्य तथा ग्रामीणविकासकार्यक्रमाणां समीक्षां कृतवन्तौ। अस्मिन् उपवेशने केन्द्र-राज्यसर्वकारयोः वरिष्ठाः अधिकारिणः अपि उपस्थिताः आसन्। अस्मिन् अवसरे श्रीचौहानः चणक-मसूर-सर्षपाणां (चना, मसूर और सरसों) सर्वकारीय-क्रयण-अवधेः (सरकारी खरीद अवधि) वर्धनाय स्वीकृतिं दत्तवान्, अस्य स्वीकृतिपत्रं च मुख्यमन्त्रिणे योगी आदित्यनाथाय समर्पितवान्। केन्द्रीयमन्त्री प्रधानमन्त्री आवास योजना-ग्रामीण इत्यस्य अग्रिमचरणाय ६ लक्ष १८ सहस्र ४८२ योग्यानां लाभार्थिनां सूचीम् अपि मुख्यमन्त्रिणे दत्तवान्। श्रीचौहानः आगामी जुलाईमासस्य प्रथमदिनाङ्कतः प्रवृत्तायाः अर्थात् 'विकसित भारत जी-राम-जी' योजनायाः प्रभावशालिनि समये च क्रियान्वयने बलं दत्तवान्। सः प्रलम्बितस्य मनरेगा-धनराशेः भुगतानस्य निस्तारणाय केन्द्रसर्वकारं प्रति शीघ्रमेव प्रस्तावं प्रेषयितुं निर्देशं दत्तवान्। उपवेशने उत्तरप्रदेशस्य कृषिक्षेत्रे 'अल्-नीनो' (Al-Nino) इत्यस्य सम्भावितप्रभावाणाम् उपरि अपि चर्चा अभवत्। कृषकाणां हितानां रक्षणाय जलसंरक्षणं, शस्यप्रबन्धनं (फसल प्रबंधन), जलवायु-अनुकूल-कृषिः तथा आपत्कालीनयोजना निर्माणं च अधिकृत्य बलं दत्तम्।

## सुभाषितम्

**दीपो भक्षयते ध्वान्तं,**
**कज्जलं च प्रसूयते।**
**यादृशं भक्षयेदन्नं,**
**जायते तादृशी प्रजा।।**

अर्थात्- एक दीपक प्रज्ज्वलित होकर अन्धकार को नष्ट करता है और इस प्रक्रिया में कालिख उत्पन्न करता है। इसी तरह जिस प्रकार का आहार लोग करते हैं उसी प्रकार उनका व्यवहार दूसरों के प्रति होता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## अन्तर्राष्ट्रीय-मादकद्रव्य-विरोधी-दिवसे 'ईगल' संस्थया वी.आई.टी-अमरावत्यां जागरूकता-कार्यक्रमः आयोजितः



हिमसंस्कृतवार्ता। अन्तर्राष्ट्रीय-मादकद्रव्य-विरोधी-दिवसस्य अवसरे आन्ध्रप्रदेश-सर्वकारस्य 'ईगल' (एलीट एन्टी-नार्कोटिक्स ग्रुप फॉर लॉ एन्फोर्समेन्ट) इति संस्थया अमरावतीस्थे वी.आई.टी-विश्वविद्यालये एकः विशेषः जागरूकता-कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे राज्यस्य गृह-आपदाप्रबन्धन-मन्त्री वी. अनिता महोदया युवान् मादकद्रव्याणां सङ्कटेभ्यः रक्षितुम् आवश्यकतायाम् बलं दत्तवती। सा अवदत् यत् मादकद्रव्याणाम् व्यसनं समाजस्य देशस्य च भविष्यस्य कृते एकः गम्भीरः सङ्कटः अस्ति। अनेन यूनां स्वास्थ्यं, प्रतिभा, तेषां स्वप्नाः च प्रभाविताः भवन्ति। मन्त्री महोदया आन्ध्रप्रदेशे "शून्य-गाञ्जा-कृषिः" (जीरो गांजा खेती) इति उपलब्धेः उल्लेखं कुर्वती राज्यस्य आरक्षकदलस्य (पुलिस) 'ईगल'-दलस्य च प्रयासानां भूरिशः प्रशंसां कृतवती।

## प्रधानमन्त्री मोदी अमेज़न-संस्थायाः मुख्यकार्यकारिणा (सीईओ) सह मिलित्वा ४८ अरब डॉलर परिमितस्य निवेशस्य स्वागतं कृतवान्



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्र मोदी भारते अमेज़न-संस्थायाः ४८ अरब डॉलर परिमितस्य कीर्तिमानस्य (रिकॉर्ड) निवेशस्य स्वागतं कृतवान्। मोदी नवदेहल्यां अमेज़न-संस्थायाः मुख्यकार्यकारिणा (सीईओ) एन्डी जेसी वर्येण सह अमिलत्। सामाजिक-माध्यमस्य (सोशल मीडिया) एकस्मिन् सन्देशे प्रधानमन्त्रिणा उक्तं यत् अनेन निवेशेन युवभ्यः नूतनाः अवसराः उत्पन्नाः भविष्यन्ति। सः अवदत् यत् एतत् भारते निवेशं कर्तुं विश्वे प्रवर्धमानां रुचिं दर्शयति।

## अल्पसङ्ख्यक-कार्य-मन्त्री किरेन रिजिजू महोदयः एन.एम.डी.एफ.सी-लाभार्थिभिः सह संवादं कृतवान्

हिमसंस्कृतवार्ता। अल्पसङ्ख्यक-कार्य-मन्त्री किरेन रिजिजू महोदयः दक्षिण-गोआ-राज्ये आयोजितस्य एकस्य विशेष-जनसम्पर्क-कार्यक्रमस्य अवसरे राष्ट्रीय-अल्पसङ्ख्यक-विकास-एवं-वित्त-निगमस्य लाभार्थिभिः सह चर्चां कृतवान्। सभाम् सम्बोधयन् श्रीरिजिजू महोदयः अल्पसङ्ख्यक-समुदायानाम् कल्याणार्थं सशक्तीकरणाय च अल्पसङ्ख्यक-कार्य-मन्त्रालयस्य प्रतिबद्धतां पुनः प्रकटितवान्। सः सूचितवान् यत् एन.एम.डी.एफ.सी-संस्थायाः कार्यक्रमाः कौशल-विकासं, उद्यमितां, वित्तीय-समावेशनं च वर्धयितुं निर्मिताः सन्ति, येषु युवसु महिलासु च विशेषं ध्यानं दत्तम् अस्ति। गोआ-राज्यस्य आर्थिकस्थितिम् अधिकृत्य केन्द्रियमन्त्री अवदत् यत् अस्य राज्यस्य प्रतिव्यक्ति-आयः अत्यधिकः अस्ति, यस्य मुख्यकारणं पर्यटनम्, आतिथ्यं, मत्स्यपालनं तथा पूर्वं प्रचालिताः खनन्-गतिविधयः सन्ति। श्रीरिजिजू महोदयः अल्पसङ्ख्यक-कल्याणाय आवंटितस्य धनस्य पर्याप्तं उपयोगं न भवितुं कारणतः चिन्तां व्यक्तवान्। सः महिलासु युवसु च उद्यमितां प्रोत्साहयितुं अधिक-प्रभावि-प्रयासानाम् आवश्यकतायाम् बलं दत्तवान्। रिजिजू महोदयः भारतस्य सांस्कृतिक-विविधतायाः तथा विविधानाम् धार्मिक-समुदायानाम् मध्ये सद्भावं रक्षितुं महत्त्वं च अपि रेखाङ्कितवान्। सः 'सोशल मीडिया' (सामाजिक-माध्यम) युगे असत्य-सूचनाभिः 'फेक न्यूज' (भ्रामक-समाचार) इत्येताभिः च सह योद्धुं सामूहिक-प्रयासानाम् आह्वानं कृतवान्।

## वाणिज्यमन्त्री पीयूषगोयलः अवदत् - भारत-ब्रिटेन-मुक्तव्यापारसन्धिः (एफटीए) सर्वाधिक-व्यापक-सन्धिष्वन्यतमः




हिमसंस्कृतवार्ता। वाणिज्य-उद्योग-मन्त्री पीयूषगोयलः उक्तवान् यत् भारत-ब्रिटेन-देशयोः मध्ये अभवत् मुक्तव्यापारसन्धिः (फ्री ट्रेड एग्रीमेन्ट), इदानीं यावत् भारतेन कृतासु सन्धिषु सर्वाधिकं व्यापकं वर्तते। शेषम् द्वितीये पृष्ठे

# मुख्यमन्त्रिणा सुक्खुना नेरी-कलांक्षेत्रे १०.६६ कोटिरूप्यकाणां १२ विकासात्मक- परियोजनानाम् उद्घाटनं शिलान्यासाश्च कृताः



**हिमसंस्कृतवार्ताः- सोलनम्।**
मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना सोलनमण्डलस्य कसौली- विधानसभाक्षेत्रस्य 'नेरी कलां' स्थाने १०.६६ कोटिरूप्यकाणां व्यययुक्तानां १२ विकासात्मिकानां परियोजनानाम् उद्घाटनं शिलान्यासश्च विहितः। मुख्यमन्त्रिणा १२.१२ कोटिरूप्यकाणां व्ययेन निर्मितस्य शालाघाट- अर्की- कुनिहार- बरोटीवालामार्गे गम्बर-खड्डे ४५ मीटर परिमितस्य 'डबल लेन आर्च' सेतोः, ३.४२ कोटिरूप्यकाणां व्ययेन निर्मितस्य 'बी.डी.ओ.' (BDO) कार्यालयभवनस्य धर्मपुरस्य तथा च 'पीएमश्री' राजकीय- वरिष्ठ- माध्यमिक- विद्यालय- प्रथा इत्यस्मिन् ५१ लक्षरूप्यकाणां व्ययेन निर्मितस्य विज्ञानभवनस्य उद्घाटनं कृतम्। तेन दत्यार-समीपे २०.८३ कोटिरूप्यकाणां व्ययेन निर्मीयमाणस्य कौशल्याबन्धस्य, १६.२४ कोटिरूप्यकाणां व्ययेन किम्मूघाटतः चक्की का मोड़ मार्गस्य सुधार-सुदृढीकरणकार्यस्य, ६.३३ कोटिरूप्यकाणां व्ययेन जंगेशूतः औडा- वाया- भनेट-मार्गस्य, ७.०३ कोटिरूप्यकाणां व्ययेन ग्रोणीतः सरी-मार्ग-वाया-बोहरों इत्यस्य उन्नयनस्य, ३.७७ कोटिरूप्यकाणां व्ययेन सुबाथू-तः ग्रामचपला-ग्रामपञ्चायत- शडयाना- मार्गे 'शहीद सुदेश मार्ग' इत्यस्य 'मेटलिङ्ग' तथा डाबर (तारकोल) लेपनस्य, ३.४८ कोटिरूप्यकाणां व्ययेन रेहलातः मठान- वाया- शार्ड-सम्पर्कमार्गस्य, ८.०६ कोटिरूप्यकाणां व्ययेन देवठी-बराह- कूनमार्गस्य सुधार-सुदृढीकरणस्य, ५ कोटिरूप्यकाणां व्ययेन धर्मपुर-कसौली-मार्गस्य उन्नयनस्य तथा च 'प्रधानमंत्री ग्राम सड़क योजना-III' अन्तर्गतं ३.०८ कोटिरूप्यकाणां व्ययेन नागलीतः चेवामार्गस्य निर्माण/ उन्नयनकार्याणां शिलान्यासाः कृताः।

# प्रत्येकपञ्चायते सज्जीभविष्यति सुरक्षाकवचम्, वर्षत्रये निर्मिताः भविष्यन्ति १५ सहस्रम् आपदारक्षकाः




**हिमसंस्कृतवार्ताः- शिमला ।** प्राकृतिक- आपदादृष्ट्या संवेदनशीले हिमाचलप्रदेशे आपदाप्रबन्धनम् अधिकं सुदृढीकर्तुं दिशि कश्चन महान् प्रक्रमः उत्थापितः। राज्यसर्वकारः आगामिषु त्रिषु वर्षेषु १५ सहस्रं (१५,०००) शिक्षितान् आपदारक्षकान् सज्जीकरिष्यति, ये कस्यामपि आपदायां आपत्कालस्थितौ वा साहाय्य-रक्षणकार्येषु प्रशासनस्य साहाय्यं विधास्यन्ति। प्रदेशस्य विभिन्नेभ्यः मण्डलेभ्यः, पञ्चायतेभ्यः, स्थानीयरुपेण समाजेभ्यश्च यूनां स्वयंसेवकानां च चयनं कृत्वा तेभ्यः आपदाप्रबन्धनस्य विशेषप्रशिक्षणं प्रदास्यते। प्रशिक्षणकाले भूकम्प-भूस्खलन- जलौघ- मेघविस्फोट- मार्गदुर्घटनाभ्यः अन्याभ्यः प्राकृतिक- मानवजनित- आपदाभ्यश्च निस्तरणस्य उपायाः पाठयिष्यन्ते। अनेन सहैव प्राथमिकोपचारः, अन्वेषण-रक्षण-अभियानं, सञ्चारप्रबन्धनम्, आपत्कालीनप्रतिक्रिया च इत्यादीनां सूचना अपि प्रदास्यते। आपदारक्षकाणां निर्माणाय राज्यस्य प्रत्येकमण्डले प्रशिक्षणकार्यक्रमाः आरब्धाः सन्ति, यत्र च जलौघसदृश्यः (बाढ़) घटनाः प्रायः भूयस्यः भवन्ति, तत्र विशेषरूपेण आपदारक्षकाः सज्जीक्रियन्ते। अस्मिन् महिलानाम् अपि सहभागिता गृह्यमाणा अस्ति। हिमाचले प्रतिवर्षं प्रावृट्काले (मानसून अवधौ) भूस्खलन- आकस्मिकजलौघ-मार्गदुर्घटनासदृश्यः घटनाः सम्मुखीभवन्ति। एतादृश्यां स्थितौ स्थानीयस्तरे शिक्षितानाम् आपदारक्षकाणाम् उपलब्धता साहाय्य- रक्षणकार्याणि तीव्रगामीनि प्रभावशालीनि च विधातुं महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। आपदायाः प्रथमावबोधनात् आरभ्य साहाय्यप्रापणं यावत् एतेषां स्वयंसेवकानां भूमिका अतीव मुख्या मन्यते। सर्वकारस्य योजनान्तर्गतं पञ्चायतस्तरं यावत् आपदाप्रबन्धनस्य सुदृढा व्यवस्था विकसिता करिष्यते, येन कस्यामपि सङ्कटवेलायां स्थानीयस्तरे सद्यःप्रतिक्रिया सुनिश्चिता भवेत्। शिक्षिताः आपदारक्षकाः प्रशासनेन, आरक्षकदलेन (पुलिस), एन.डी.आर.एफ., एस.डी.आर.एफ. अन्याभिश्च संस्थाभिः सह समन्वयं कृत्वा कार्यं विधास्यन्ति। पर्वतीयराज्ये आपदासंकटं न्यूनीकर्तुं जनहानिम् अवरोद्धु च सामुदायिकसहभागिता एव सर्वोपरि प्रभावी माध्यमः अस्ति। अतः १५ सहस्र-आपदारक्षकाणाम् एषा चमूः (सेना) प्रदेशस्य आपदाप्रबन्धनक्षमतायै नूतनं बलं प्रदास्यति। राज्यसर्वकारस्य लक्ष्यं केवलं साहाय्य-रक्षणकार्याणि यावत् सीमितं नास्ति, अपितु जनेषु आपदां प्रति जागरूकतावर्धनं तथा च आपदापूर्व-सज्जतायाः संस्कृतेः विकासः अपि वर्तते। एतदेव कारणं यत् अस्य अभियानस्य ग्रामं ग्रामं यावत् प्रापणस्य योजना निर्मिता अस्ति।

## पीयूषगोयलः...

लन्दन-नगरे 'इण्डिया ग्लोबल फोरम' इत्यस्य 'यूके-इण्डिया वीक' कार्यक्रमे श्रीगोयलः अवदत् यत् अनया सन्ध्या द्वाभ्यां देशाभ्यां प्राप्यमाणानाम् आर्थिकलाभानां सम्भावनाः अतीव अधिकाः सन्ति। श्रीगोयलः त्रिदिवसीय-ब्रिटेन-यात्रायाम् अस्ति। अस्मिन् अवसरे सः १५ जुलाईतः प्रवृत्तस्य भारत-ब्रिटेन-व्यापक-आर्थिक-व्यापार-सन्धेः सज्जतानां समीक्षां करोति। सः द्वयोः देशयोः उद्योगजगत् अस्य अवसरस्य लाभं ग्रहीतुम् तथा व्यापारं नूतनोन्नतौ नेतुं महत्त्वाकांक्षि-लक्ष्यं निर्धारयितुम् आह्वानं कृतवान्। सः अवदत् यत् अनया सन्ध्या द्वयोः देशयोः मध्ये प्रायः ४८ अरब पाउण्ड् (४८ बिलियन पाउण्ड्) परिमितस्य वार्षिकव्यापारस्य अधिकं प्रोत्साहनं मिलिष्यति।केन्द्रीयमन्त्री अकथयत् यत् भारतं ब्रिटेनदेशः च रक्षा-महत्त्वपूर्णखनिज-सदृशेषु क्षेत्रेषु अपि सहयोगं वर्धयतः। श्रीगोयलः अवदत् यत् द्वौ देशौ आतङ्कवादस्य प्रतिकाराय तथा वैश्विकशान्तिं, स्थायित्वं, समृद्धिं च वर्धयितुं प्रतिबद्धौ स्तः।



## वेनेजुएलादेशे दशमलवद्वि-उत्तर सप्ततः सार्धसप्तमित-तीव्रतांकानां भूकम्पानां कारणेन बहूनि भवनानि भग्नीभूतानि

हिमसंस्कृतवार्ता। वेनेजुएला-देशस्य राष्ट्रपतिपदासीना डेल्सी रोड्रिग्स् वर्या प्रातःकाले कराकस-नगरं परितः क्षेत्रेषु च दशमलवद्वि-उत्तर सप्ततः सार्धसप्तमित-तीव्रतांकानां भूकम्पानां कारणेन बहूनि भवनानि भग्नीभूतानि येन देशे आपत्कालस्य घोषणां कृतवती। राष्ट्रपतिः अवदत् यत् शक्तिशाली भूकम्पानां श्रृङ्खलायाः अनन्तरं द्वात्रिंशज्जनाः मृताः, सप्तशततोऽधिकाश्च जनाः व्रणिताः सन्ति। एतन्निमित्तम् उपराष्ट्रपतिः सी. पी. राधाकृष्णन प्रधानमन्त्री नरेन्द्रमोदी च दुःखम् प्रकटितवन्तौ। सामाजिक-प्रसार माध्यमे प्रधानमन्त्रिणा मोदिना उक्तम् यत् भारतं सर्वैः पीडितैः सह ऐक्येन स्थितम् अस्ति, सर्वेभ्यश्च यथासम्भव साहाय्यं प्रदातुञ्च आश्वस्तिम् अददात्।

## जापान-देशस्य ऐशान्य भागे सप्त दशमलव द्वि तीव्रतायाः शक्तिशाली भूकम्पः

गतप्रातः जापान-देशस्य ऐशान्य भागे सप्त दशमलव द्वि तीव्रतायाः शक्तिशाली भूकम्पः अभवत्, येन न्यूनातिन्यूनं चत्वारः जनाः आहताः। इवाते प्रान्तस्य पूर्व-तटे प्रायः चत्वारिंशत् किलोमीटर-मिते गाम्भीर्ये षट्-दशमलव-नव तीव्रतायाः कम्पनम् अभवत्। जापान-ऋतु-विज्ञान-संस्थायाः अनुसारं, जापानस्य सप्त-अङ्कीय-भूकम्पीय मापके एषः उच्च-षट् इति द्वितीय-सर्वोच्च-स्तरं मापितवान्। कम्पनं टोकियो सहितेषु अनेकेषु प्रान्तेषु अनुभूतम्, परन्तु सुनामी-चेतावनी न प्रसारिता। प्राधिकारिणः नाभिकीय-विद्युत-संयन्त्रेषु किमपि असामान्यं न प्रतिवेदितवन्तः, तथा च निवासिनः अग्रे अपि प्रबल-कम्पनानां कृते सतर्काः भवितुं परामृष्टाः।

# IIT MANDI CONFERENCE- विशेषज्ञाः अवदन्- एकं न, बहवः सङ्कटाः सहैव, निर्मातव्या भविष्यति बहु- आपदा-रणनीतिः



**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** हिमालयीक्षेत्रेषु जलौघः (बाढ़), मेघविस्फोटः, हिमनदीयहृदविस्फोटः, भूस्खलनं भूकम्पः च सदृश प्राकृतिक-आपदां वर्धमान-संकट-मध्ये विशेषज्ञैः सचेतना दत्ता यत् केवलम् एकल- आपदा- आधारिताः योजनाः अधुना पर्याप्ताः न भविष्यन्ति। बहु-आपदा-संकटं ध्यात्वा समन्वित-रणनीति-स्वीकरणाय, प्रारम्भिक- सचेतना- प्रणाल्याः सुदृढीकरणाय, वैज्ञानिक- शोधकार्यं प्रभावी-नीतिषु परिवर्तयितुं दिशि तीव्रगत्या कार्यकरणस्य आवश्यकता वर्तते। एषः निष्कर्षः 'आईआईटी मण्डी' मध्ये आयोजिते त्रिदिवसीये अन्तर्राष्ट्रिय- जलवायु एवम् आपदा रोधी-हिमालय- सम्मेलनस्य समापने सम्मुखम् आगतः। एतत् सम्मेलनम् आईआईटी-मण्डी इत्यस्य वैश्विकसम्मेलनसंस्थानस्य निदेशकस्य प्रो. लक्ष्मीधरबेहरामहोदयस्य संरक्षणे अभवत्। अस्य अध्यक्षता प्रो. कलावेङ्कटउदयेन कृता। आयोजनसचिवः प्रो. विवेकगुप्तः आसीत्। सम्मेलने देश-विदेशयोः वैज्ञानिकाः, अभियन्तारः (इंजीनियर्स), नीतिनिर्मातारश्च हिमालयीक्षेत्रस्य सम्मुखे वर्धमानानां जलवायु- आपदा-सम्बन्धि- आह्वानानाम् उपरि मन्थनं कृतवन्तः। सम्मेलनस्य उद्देश्यं वैज्ञानिक-अनुसन्धानस्य, नीतिगत-निर्णयानां, अभियान्त्रिक-समाधानानां च मध्ये सामञ्जस्यं प्रस्थाप्य हिमालयीक्षेत्रस्य आपदा- प्रतिरोधि- क्षमतां सुदृढीकरणम् आसीत्। सम्मेलने 'जॉर्जिया प्रौद्योगिकी संस्थान' इत्यस्य प्रो. जे. डेविड फ्रॉस्ट, 'कैलिफोर्निया विश्वविद्यालय मर्सिड' इत्यस्य प्रो. सफीक खान, 'इम्पीरियल कॉलेज लंदन', 'मिशिगन स्टेट विश्वविद्यालय', विभिन्नाः आईआईटी, 'सीएसआईआर-राष्ट्रीय भूभौतिकीय अनुसंधान संस्थान', 'राष्ट्रीय जल विज्ञान संस्थान', 'राष्ट्रीय भूकम्प विज्ञान केंद्र' समेतानां बह्वीनां संस्थानां विशेषज्ञाः भागं गृहीतवन्तः। तकनीकी- सत्रेषु बहु-आपदा-जोखिम-आकलनम्, जलवायु- पूर्वानुमानम्, जल-हिमनदी-सम्बद्धाः तीव्राः घटनाः, भूकम्परोधी-आधारभूतसंरचना, एआई, 'मशीन लर्निंग' आधारित प्रारम्भिक- सचेतना-प्रणाली, समाज- आधारित- आपदाप्रबन्धनम् इत्यादिषु विषयेषु विस्तृता चर्चा सञ्जाता। विशेषज्ञैः कथितं यत् अत्यधिकवृष्टिसदृशी एका घटना जलौघं, भूस्खलनं, संरचनात्मकक्षतिं च सदृश्यः बह्वीः आपदाः सहैव जनयितुं शक्नोति। अतः समग्रजोखिमस्य आधारेण योजनानिर्माणं, विभिन्नानां संस्थानां मध्ये अङ्क-साझाकरणं, जोखिम-मानचित्रणं, सुदृढ-अवसंरचनायां निवेशः, स्थानीयानां समाजानां सहभागितावर्धनम् अतीव आवश्यकं वर्तते। अनेन सहैव वैज्ञानिक- अनुसन्धानाय प्रभावी-नीतिषु परिवर्तयितुं, तस्य लाभं च सङ्कटग्रस्तान् ग्रामान्, नगराणि, महत्त्वपूर्णाः अवसंरचनाः यावत् प्रापयितुम् उपरि अपि बलं दत्तम्।

# मन्त्रिणा जगत्सिंहनेगिना किन्नौर- मण्डलाध्यक्षस्य नियुक्तौ प्रकटितः रोषः

**हिमसंस्कृतवार्ताः- शिमला ।** हिमाचलप्रदेशकाङ्ग्रेसदले गुटबन्धनस्य अन्यदेकं प्रकरणं सम्मुखम् आगतं, यत्र किन्नौरक्षेत्रे काङ्ग्रेसमण्डलाध्यक्षस्य नियुक्तिं अधिकृत्य दलस्य अन्तः विवादः गम्भीरः जातः अस्ति। राजस्वमन्त्री जगत्सिंहनेगी अस्याः नियुक्त्या अतीव रुष्टः अस्ति, तेन च स्वकीयदले एव गम्भीराः आरोपाः कृताः। नेगिना न केवलम् एषा नियुक्तिः अनुचिता कथिता, अपितु दलस्य अन्तः 'भाजपायाः सुप्तकोशिकानां' (स्लीपर सेल) सक्रियाणां भवितुं पक्षम् अपि कृतम्।

### मण्डलाध्यक्षनियुक्तौ मन्त्रिणः तीक्ष्णा प्रतिक्रिया

किन्नौरतः विधायकः हिमाचलसर्वकारे च राजस्वमन्त्री जगत्सिंहनेगी दलेन 'निगम भण्डारी' महोदयस्य मण्डलाध्यक्षपदे नियुक्तिकरणस्य निर्णयं प्रति मुक्तरूपेण असन्तोषं प्रकटितवान्। तेन कथितं यत् सः सुदीर्घकालात् इमं विषयम् उत्थापयन् आसीत्, अधुना च भाजपानेतारः अपि तस्य वचनस्य पुष्टिं कुर्वन्तः सन्ति। नेगी स्वस्य सुदीर्घ-राजनैतिकानुभवस्य उल्लेखं कुर्वन् अवदत् यत् तेन तस्मिन् काले काङ्ग्रेसस्य कृते कार्यं कृतं यदा क्षेत्रे दलस्य स्थितिः दुर्बला आसीत्। तस्यानुसारं, तस्य पित्रा मण्डले काङ्ग्रेसस्य आधारशिला स्थापिता आसीत्, परन्तु अद्य तादृशेभ्यः जनेभ्यः उत्तरदायित्वं प्रदीयते ये दलस्य विचारधारायाः विपरीताः सन्ति। तेन एतस्यापि उपरि बलं दत्तं यत् निर्वाचनं पराजितेभ्यः जनेभ्यः नेतृत्त्वप्रदानं दलस्य विचारधारायाः पराजयः अस्ति।

### 'स्लीपर सेल' इत्येषाम् आरोपः भाजपया सह सम्बद्धतायाः पक्षं च

जगत्सिंहनेगिना अस्मिन् विषये स्वस्य परामर्शं न गृहीतत्वात् अपि प्रश्नाः उत्थापिताः। तेन साक्षात् आरोपः कृतः यत् काङ्ग्रेसस्य अन्तः स्लीपर सेल इति सक्रियाः सन्ति, याः दलस्य कृते अतीव विनाशकारिण्यः सिद्ध्या भवितुं शक्नुवन्ति। नेग्यानुसारं, एताः 'सुप्तकोशिकाः' भाजपायाः 'बी- टीम' इव कार्यं कुर्वन्त्यः सन्ति, भाजपानेतृणाम् वक्तव्यैः अपि तस्य अस्य पक्षस्य पुष्टिः भवति। तेन उक्तं यत् मण्डलस्य निर्वाचितः प्रतिनिधिः सन्नपि, एतादृशात् महत्त्वपूर्णात् निर्णयात् पूर्वं तेन सह कोऽपि संवादः न कृतः, यत् सर्वथा अनुचितं वर्तते।

## दलस्य हान्याः आशङ्का

मन्त्री जगत्सिंहनेगी सचेतनां दत्तवान् यत् एतादृशैः निर्णयैः काङ्ग्रेसदलाय हानिः भवितुं शक्नोति। तेन मन्यते यत् दलस्य अन्तः असन्तोषेण दोषपूर्णनियुक्तिभिश्च कार्यकर्तॄणां मनोबलं पतति, एतत् च निर्वाचनप्रदर्शने नकारात्मकं प्रभावं जनयितुं शक्नोति।

# सीयूसीईटी २०२६: हिमाचलस्य त्रयः छात्राः राष्ट्रियमार्गदर्शिकायां (मेरिट-सूच्यां) स्थानं प्राप्तवन्तः, उदितेन तृतीयः अखिलभारतीयक्रमाङ्कः लब्धः



**हिमसंस्कृतवार्ताः-** शिमला। राष्ट्रीयपरीक्षासंस्थया आयोजितया विश्वविद्यालय- संयुक्तप्रवेशपरीक्षया 2026 हिमाचलप्रदेशस्य त्रिभिः छात्रैः राष्ट्रिययोग्यतासूच्यां स्थानं सम्प्राप्य प्रदेशस्य गौरवं वर्धितम्। प्रायः पञ्चदशलक्षमितैः (१५ लाख) परीक्षार्थिभिः दत्तस्यास्याः परीक्षायाः परिणामः जूनमासस्य त्रयोविंशतितमे (२३) दिनाङ्के घोषितः। परिणामेषु हिमाचलस्य उदितचतुर्वेदी महोदयेन १२०७ 'एनटीए' अङ्कैः सह सम्पूर्णे देशे तृतीयं स्थानं प्राप्तम्। अपरपक्षे, सङ्कल्पकमलेन १०६७ अङ्काः तथा चिरागनेगिना १००६ अङ्काः प्राप्य राष्ट्रिययोग्यतासूच्यां स्वस्थानं सुरक्षितं कृतम्। उदितचतुर्वेदी सोलनमण्डलस्य 'अर्की' क्षेत्रस्य निवासी अस्ति। तेन दशमीकक्षापर्यन्तं शिक्षा 'न्यू शिमला' स्थित 'डीएवी' विद्यालयात् प्राप्ता, यदा च द्वादश्याः परीक्षा देहल्याः 'रोहिणी' स्थित 'डीएवी' विद्यालयात् ९८.४ प्रतिशतम् अङ्कैः सह उत्तीर्णा। सीयूसीईटी-२०२६ परीक्षायाम् अखिलभारते तृतीयं स्थानं लब्ध्वा तेन स्वविद्यालयस्य, प्रदेशस्य, परिवारस्य च नाम आलोकितं कृतम्। उदितस्य लक्ष्यं देहल्याः प्रतिष्ठितं 'श्रीराम कॉलेज ऑफ कॉमर्स' इति महाविद्यालये प्रवेशं प्राप्य उच्चशिक्षाग्रहणम् अस्ति, यत् अधुना तस्य अस्याः उपलब्धेः कारणात् साकारं भवद् दृश्यते।

# विश्वः अधुना अधिक-शस्त्रीकरणं, अधिक-समाह्वानानां स्वीकरणं, सामाजिक-माध्यम-युगाय उपयुक्तां राजनीतिं च पश्यति



विदेशमन्त्री डॉ. एस. जयशङ्करः अवदत् यत् विश्वः अधुना अधिक-शस्त्रीकरणं, अधिक-समाह्वानानां स्वीकरणं, सामाजिक-माध्यम-युगाय उपयुक्तां राजनीतिं च पश्यति। दक्षिण-कोरिया-देशे 'जेजु-फोरम फॉर पीस एण्ड प्रॉस्पेरिटी 2026' इति सम्मेलने सम्बोधयन् डॉ. एस्. जयशङ्करः वैश्विक आह्वानानां निराकरणाय अधिक-अन्ताराष्ट्रिय-सहकार्यस्य आवश्यकताम् अपि उद्घोषयत्। "वसुधैव कुटुम्बकम्" इति भारतस्य प्राचीन-दर्शनम् उद्धृत्य, अधिक-सहकार्यपूर्ण-विश्व-व्यवस्थायाः निर्माणाय तमेव मार्गदर्शक सिद्धान्तं निर्दिष्टवान् च।

# प्रधानमन्त्रिणा नरेन्द्रमोदिना संविधान-हत्या-दिवसस्य अवसरे पूर्वप्रधानमन्त्रिणा अटलबिहारी-वाजपेयी-वर्येण लिखितायाः काव्यस्य पङ्क्तयः पठिताः



गतदिने संविधान-हत्या-दिवसः आचरितः। पञ्चसप्तत्युत्तरैकोनविंशतितमे वर्षे जून्-मासस्य पञ्चविंशे दिनाङ्के यदा भारतस्य संविधानस्य पददलनं जातम्, तदा किं जातमिति एतत् दिनं स्मारयति। आपातकाले आधिक्येन पीडिताय प्रत्येकस्मै जनाय श्रद्धाञ्जलिं दातुम् अपि एषः दिवसः अस्ति। उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः च अद्य आपातकालस्य समये लोकतान्त्रिकमूल्यानां रक्षणार्थं दृढतया स्थितेभ्यः सर्वेभ्यः श्रद्धाञ्जलिम् अर्पितवन्तः। सामाजिक-प्रसार माध्यमे प्रधानमन्त्रिणा मोदिना उक्तम् यत् आपातकालः संविधानस्य उपरि प्रत्यक्षः आक्रमणः आसीत्। सः अवदत् यत् अवसरेऽस्मिन् नागरिकस्वातन्त्र्यस्य निलंबनं, अभिव्यक्ति-स्वातन्त्र्यस्योपरि प्रतिबन्धः, राजनैतिकनेतृणां, पत्रकाराणां, सामाजिककार्यकर्तृणां च बन्धनम् अभवत्। भाजपेति दलेन आपातकालस्य विषये काङ्ग्रेस् पक्षस्य उपरि प्रहारं कुर्वता भारतीय-इतिहासस्य कृष्णोऽध्यायः इत्युक्तम्। नवदेहली-नगरस्य पार्टी-मुख्यालये प्रसारमाध्यमान् सम्बोधयन्, भाजपेति दलस्य वरिष्ठः नेता रविशङ्करप्रसादः अवदत् यत् आपातकालस्य समये तत्कालीनप्रधानमन्त्री इन्दिरागान्धी-वर्यायाः आसन्दं रक्षितुं न्यायपालिकायाः उपरि आक्रमणं जातम्, प्रसारमाध्यमानि पीडितानि, विपक्षस्य नेतारः कारावासिनः कृताश्च। आपातकालकाले प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य भूमिकायाः प्रशंसां कुर्वन् श्रीप्रसादः अवदत् यत् मोदीवर्यः गुजराततः उत्तरभारतं यावत् उल्लेखनीयरूपेण प्रयत्नान् अकरोत् इति।

## पीएम-वाजपेयिनः कविताः

प्रधानमन्त्रिणा नरेन्द्रमोदिना संविधान-हत्या-दिवसस्य अवसरे पूर्वप्रधानमन्त्रिणा अटलबिहारी-वाजपेयी-वर्येण लिखितायाः काव्यस्य पङ्क्तयः पठिताः। सामाजिक-प्रसार-माध्यमे श्रीमोदी अपठत् यत् एषा कविता न केवलं पङ्क्तिसङ्ग्रहः अपितु आपातकाले लोकतन्त्रस्य उपरि आरोपितायाः वेदनायाः, श्वसनावरोधस्य, प्रतिबन्धानाञ्च सजीव-अभिव्यक्तिः अस्तीति। सः अवोचत् यत् वाजपेयी-वर्यस्य कालातीतानि पद्यानि भारतस्य लोकतान्त्रिक-इतिहासस्य कृष्णतमेषु अध्यायेषु एकस्य कृते निरन्तरं स्वरं ददतीति।

## "लौकिकन्यायकोशः"
## "ऊहापोहन्यायः"

ऊहः नाम तर्कः। अपोहः नाम तस्य तर्कस्य निराकरणम्। कस्मिन् अपि वादविवादप्रसंगे तर्कः तर्कनिराकरणम् इति रीत्या वाद-विवादौ प्रचलतः। ऊहापोहः नाम वादविवादौ इति अर्थः रूढः। पूर्णचर्चा इति अस्य न्यायस्य अर्थः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्



## श्रीत्रिलोकनाथमन्दिरम्
### (त्रिलोकनाथ मंदिर)

त्रिलोकनाथमन्दिरं हिमाचलप्रदेशस्य लाहौल-स्पीति-मण्डलस्य उदयपुर-उपमण्डले अवस्थितम् अस्ति। एतत् मन्दिरं लाहौल-स्पीति-मण्डलस्य मुख्यकार्यालयात् कीलाङ्गतः प्रायः 45 किलोमीटर, मनालीतः च 146 किलोमीटर दूरे वर्तते। त्रिलोकनाथमन्दिरस्य प्राचीनं नाम 'टुंडा विहार' इति अस्ति। एतत् पवित्रं मन्दिरं हिन्दूनां बौद्धानां च कृते समानरूपेण पूजनीयम् अस्ति। हिन्दवः त्रिलोकनाथं 'शिवरूपेण' पूजयन्ति, यदा च बौद्धाः इमं देवं 'आर्य अवलोकितेश्वर' इति मन्यन्ते। तिब्बतीभाषाभाषिणः जनाः एनं 'गरजा फग्स्पा' इति कथयन्ति। एतत् पवित्रं तीर्थं उप-कैलासात् मानसरोवरात् च अनन्तरं सर्वोत्कृष्टं पूजनीयं च तीर्थं मन्यते। अस्य मन्दिरस्य वैशिष्ट्यं अस्मिन् तथ्ये निहितं यत् सम्पूर्णे विश्वे एतादृशं एकमात्रं मन्दिरम् अस्ति यत्र हिन्दवः बौद्धाः च एकस्मै एव देवाय स्वादरं प्रस्तुन्वन्ति। एतत् मन्दिरं चन्द्रभागाघाटीमध्ये पश्चिमीहिमालयक्षेत्रे स्थितम् अस्ति। एतत् परमं आध्यात्मिकं स्थानं वर्तते, यत्र दर्शनं प्रार्थनां च कृत्वा भक्ताः त्रयाणां सम्प्रदायानां स्वामिनः श्रीत्रिलोकनाथस्य आध्यात्मिकं आशीर्वादं प्राप्नुवन्ति।




# प्रेरककथा-
# ईश्वरः पश्यति

अस्माकं क्षेत्रे एकः घृतविक्रेता (डेयरीवाला) आसीत्। तस्य नियमः आसीत् - यदि पञ्चशतग्राममिते (५०० ग्राम) घृते द्वौ ग्रामौ अधिकौ भवेताम्, तर्हि सः तौ निष्कासयति स्म। सः तोलने निपुणः आसीत्, परन्तु मनसा कुटिलः आसीत्।

एकस्मिन् दिने अहं घृतं क्रेतुं गतवान्। सः भ्रमेण मह्यं नवति (९०) रूप्यकाणि अधिकानि दत्तवान्। मम मनसि लोभः उत्पन्नः। अहं अचिन्तयम् - "एषः तु द्वौ-द्वौ ग्रामौ कृत्वा बहु धनं रक्षितवान् स्यात्, अद्य तस्य लेखा पूर्णः जातः।" अहं धनं कोषे स्थापितवान्, गृहं च आगतवान्।

गृहं आगत्य अहं पत्न्यै घृतपात्रं दत्तवान्। सा यदैव तत् पात्रं परिवर्तितवती, तदैव अर्धं घृतं भूमौ अपतत्। साक्षात् पाकशालायाः प्रणाले। नवति रूप्यकाणां घृतं नष्टं अभवत्, माता च अकारणम् अक्रुध्यत्। तदैव एका लोकोक्तिः स्मृता - "चौर्यस्य धनं मोर्यां (नाले) गच्छति।"

## द्वितीयः प्रसङ्गः

कतिपय मासानन्तरं अहं 'वेज-रोल' क्रेतुं गतवान्। आपणिकः (दुकानदार) मह्यं सप्तति (७०) रूप्यकाणि अधिकानि दत्तवान्। अहं अचिन्तयम् - "चलतु, अद्य पुनः ईश्वरस्य परीक्षां कुर्मः।" अहं धनं स्वीकृतवान्। गृहं आगच्छन् मार्गे एकः रोलः भूमौ अपतत्। द्वितीयं रोलं अहं उत्पीठिकायाः (मेज़) उपरि स्थापितवान्, रसनिष्कासनाय काचहस्तकं (ग्लास) उत्थापितवान् - तत् मम हस्तात् च्युत्वा खण्डशः अभवत्। सप्तति रूप्यकेषु षष्टि रूप्यकाणां हानिः तु तदैव अभवत्।अहं चकितः आसम्। किं सत्यमेव कोऽपि लेखां रक्षति?

## तृतीयः प्रसङ्गः

परस्मिन् दिने 'सुभिक्षा' आपणिकः मह्यं त्रिंशत् (३०) रूप्यकाणि अधिकानि दत्तवान्। अस्मिन् वारे अहं पत्निं अपृच्छम् "किं पुनः एकः प्रयासः करणीयः?" सा हसित्वा अवदत् - "न हि।" वयं तत् धनं प्रत्यर्पितवन्तः।

बहिः आगमने एव पत्नी अवदत् - "तथापि एकः प्रयासः करणीयः आसीत्।" एतावतः एव सा स्खलिता, पतनात् च कथमपि रक्षिता। तस्मिन् दिने मया अवगतं - सः प्रतिक्षणं पश्यति।

## उपसंहारः

वयं आपणानां पुरतः फलकानि पश्यामः - "भवान् छायाचित्रकस्य (कैमरे की) दृष्टौ अस्ति।" परन्तु वास्तवतः वयं प्रतिक्वासे, प्रतिनियमने, प्रतिकर्मणि च "तस्य" दृष्टौ स्मः। सः प्रत्येकस्मात् असत्कर्मात् पूर्वं अन्तरात्मनः स्वरः भूत्वा अस्मान् रोधयति। श्रवणं न श्रवणं च अस्माकं विवेके अस्ति।

## शिक्षा (नीतिः):

लघुरूपः लोभः महतीं हानिं कारयति। सत्यनिष्ठायाः (ईमानदारी) कोऽपि लघुमार्गः (शॉर्टकट) न भवति। यत् ईश्वरः ददाति, तदेव तिष्ठति। असत्यमार्गेण अर्जितं धनं तथैव गच्छति, यथा हस्तात् सः काचहस्तकः (ग्लास)।